Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# AFMA–137

## M.A. (Final) Examination, 2023

## SANSKRIT

### वर्ग 'आ' वैदिक साहित्य तथा संहिता पाठ

Paper - VII

*Time : **3** Hours* ] [ *Maximum Marks : **100***

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्नाः अनिवार्याः। पञ्चाशत् शब्देषु उत्तरो प्रदेयः।

   (i) 'सूर्य आत्मा जगतस्तस्थुषश्च' संस्कृतेन स्पष्टं कुरुत।

   (ii) ऋग्वेदीय-दशममण्डले 164 तमस्य सूक्तस्य कः छन्दः कः ऋषि का च देवता ? संस्कृतेन लिखत।

(iii) ब्रह्मचारीसूक्तस्य ऋषि: देवता छन्दश्च कथनीय:।

(iv) भुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्माहुत राजयक्ष्मात्।

ग्राहिर्जग्राह यद्येतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम्॥

मन्त्रस्य भाव: लेखनीय:।

(v) प्राणसूक्तस्य ऋषि देवता छन्दश्च कथनीय:।

(vi) दु:स्वप्ननाशनसूक्तस्य क: अभिप्राय: ?

(vii) वेदपाठ: कतिविधो भवति ? नामानि लिखत।

(viii) यतो यत: समीहसे ............ पूर्णं मन्त्रं लिखत।

(ix) 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति कथनस्य क: अभिप्राय: ?

(x) आचार्यसायण: वेदमन्त्राणामपौरुषेयत्वं कथं प्रतिपादितवान् ?

**खण्ड–ब**

**नोट** :– अधोलिखितेषु पञ्चप्रश्ना: समाधेया: (प्रश्नसंख्या द्वितीय: तृतीयश्च अनिवार्यौ स्त:)। शतद्वयेषु शब्देषु **(200)** उत्तरो लेखनीय:।

2. कस्यचिदेकस्य मन्त्रस्य संस्कृतमाध्यमेन व्याख्या विधेया–

(क) मार्जाल्यो भृज्यते स्वे दमूना: कवि प्रशस्तो अतिथि: शिवो न:।

सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान्॥

(ख) सक्तुमिव तितडना पुनन्तो यत्रधीरा मनसा वाचमक्रत।

अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥

3. कस्यचिदेकस्य मन्त्रस्य ससंदर्भं व्यासख्यां संस्कृतमाध्यमेन कुर्वन्तु–

(क) मोघमन्नं विन्दते अप्रचेता: सत्यं ब्रवीमि वध इत्सतस्ये।

नार्यममणं पुष्यति नो सखायं केवलाधो भवति केवलादी॥

(ख) ऋतं च सत्यं चाभीमद्धात् तपसोऽध्यजायत।

ततो राउर्यजायत तते: समुद्रो अर्णव:॥

4. उपर्युक्त मन्त्रयोरेकस्य मन्त्रस्य पदपाठ: करणीय: छन्दस्य लक्षणश्च लेखनीय:।

5. कस्यचिदेकस्य मन्त्रस्य अर्थः विधेय–

(क) आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।

महे रणाय चक्षसे॥

(ख) द्यौष्ट्वा पिता पृथिवी माता जरामृत्युं कृणुतां संविदाने।

यथा जीवा अदितेरुपस्थे प्राणापानाभ्यां गुपितः शतं हिमाः॥

6. कस्यचिदेकस्य मन्त्रस्य सप्रसंगं व्याख्या करणीया–

(क) अहं केतुरहं मूर्धाऽहमुग्रा विवाचनी।

ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥

(ख) अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।

आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृशे॥

7. कस्यचिदेकस्य मन्त्रस्य टिप्पणियुता संदर्भयुता च व्याख्या विधेया–

सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः।

इन्द्रस्य त्वा भागं सोमेनातनच्मि विष्णो हत्यं रक्ष।

**अथवा**

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रयोदयात्।

8. वेदस्य स्वतः प्रामाण्यं सायणाचार्यानुसारेण प्रतिपाद्यताम्।

**अथवा**

सायणमतेन वेदस्य वेदता व्याख्येया।

**खण्ड–स**

**नोट** :– अधोलिखितेषु चतुर्षु प्रश्नेषु द्वौ प्रश्नौ शतपञ्चषु (**500**) शब्देषु समाधेयौ–

9. मन्त्रद्वयस्य ऋषिच्छन्द देवतादिनिर्देशपूर्वकं व्याख्या सम्पादनीया–

(क) अग्निर्होता न्यसीदद् यजीयानुपस्थे मातुः सुरभा उ लोके।

युवा कविः पुरुनिःष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः।

(ख) अभिवृष्टा ओषधयः प्राणेन समवादिरन्।

आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः॥

(ग) इमा भूमिं पृथिवीं ब्रह्मचारी भिक्षामा जमार प्रथमो दिवं च।

ते कृत्वा समिधातुपास्ते तयोरार्पिता भुवनानि विश्वा॥

(घ) सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै।

सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥

10. सूक्त द्वयस्य सारांशं प्रतिपाद्यताम्—

(क) सूर्यसूक्तम्

(ख) वावसूक्तम्

(ग) ब्रह्मचारी सूक्तम्

(घ) सांमनस्य सूक्तम्

11. कयोश्चिद् द्वयोः मन्त्रयोः ऋषिछन्ददेवतामिः सह ससन्दर्भं सटिप्पणश्च व्याख्या विधेया—

(क) इषे त्वोर्ज्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमहन्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि।

(ख) पृथिवि देवयजन्योषध्यास्ते मूलं मा हिं सिषं व्रज गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान दैव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्।

(ग) स्योना पृथिवि नो भवानृक्षरा निवेशनी।

यच्छा नः शर्म सप्रथाः॥

(घ) हते हंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥

12. सायणकृत ऋग्वेदभाष्यभूमिकामनुसृत्य सयुक्तियुक्तं ग्रन्थस्य सारलेख्यम्।

**अथवा**

सायणकृत ऋग्वेदभाष्यभूमिकामधिकृत्य वेदानामपौरुषेयत्वं प्रतिपादयत।